 जः ॥ मानधिविभ्रत्सुमनोमानधिमासीन्नवासुदेवोजः ॥ ४ ॥ सोजनिदेवक्यंतेयस्मादनुकंपनावदेवक्यं 
॥ १ ॥ ते ॥ अवदन्देवक्यंतेभुवनंहिसुराःसदैवदेवक्यंते ॥५॥ नीतोवसुदेवेनस्वततेनसगोकुलंसुवसुदेवेन ॥ तत्र
यशोदातनयंमेनेकृष्णंस्वकीयमवदातनयं ॥६॥ ववृधेगोकुलमध्याद्योदेवोविश्वमद्भुताकुलमध्यात् ॥ तत्रच
पूतनिकायावधमकरोद्यन्निजाःसपूतनिकायाः ॥७॥ अधुनोच्छकटंलोलीपादांगुष्ठेनवातपेशशकटंलोली ॥
अतनोद्रक्षामस्यस्वाज्ञानाद्गोपिकासदेरक्षामस्य ॥८॥ मुखलालनलोलातन्मुखगंजगदचष्टसालनलोलात
त्॥ नाध्यैन्मायामस्यजगत्प्रभोःस्वाधिकततमायामस्य ॥९॥ तस्यसुशर्माण्यकरोदरिणोगर्गःसदुक्तिकर्मा
ण्यकरोत् ॥ अवदन्नामानमयंजगदादिंवासुदेवनामानमयं ॥१०॥ तस्यसखाबलनामाज्येष्ठोभ्राताथयन्निजा
बलनामा ॥ यस्यचपर्यंकोयंपूर्वतनोविष्णुमजसपर्यंकोयं ॥११॥ तेनहतोवातरयस्तृणचक्रोनामदितिसुतो
वातरयः ॥ हरमाणोबालतमंस्वात्मानंकंठरोधिनाबालतमं ॥१२॥ सोवनिमध्येरंगन्नरिदरयुग्बालरूपमध्येरं
गन्॥ अमुषन्नवनीतमदःस्वगोकुलेगोपिकासुनवनीतमदः ॥१३॥ तन्माताकोपमितातमनुससारात्मवादवा 
कोपमिता ॥ जगृहेसानमनंतंदेवंतच्चिंतयैवसानमनंतं ॥१४॥ अथसांतरितामानंविष्णुंविश्वोद्भवंसदांतरि

तामानं ॥ अनयद्दामोदरतांयोऽरमयत्सुंदरींनिजामोदरतां ॥१५॥ चक्रेसोर्जुननाशंप्राप्नोतियत्स्मृतिःसदार्जु
ननाशं ॥ तौचगतौनिजमोकस्तेनैवनुतेनयन्निजानिजमोकः ॥१६॥ अथवृंदावनवासंगोपाश्चक्रुर्जगत्क्षिता
वनवासं ॥ तत्रबकासुरमारःशौरिरभून्नित्यसंश्रितासुरमारः ॥१७॥ अहनद्वत्सतनूकंयोपाल्लोकंस्वयत्नवत्स
तनूकं ॥ सोपाद्वत्सानमरःसहाग्रजोगोपवत्सवत्सानमरः ॥१८॥ सविभुःश्रीमानहिकेननर्तयस्यश्रमानमा
नहिके ॥अकरोन्नद्युदकांतंकांतंनीत्वोरगंसनाद्युदकांतं ॥१९॥ हत्वाधेनुकमूढंबलात्प्रलंबंचखेटसधेनुकमू
ढं ॥ व्रजमावीदमृताशःपीत्वावह्निंचरस्थिरादमृताशः ॥२०॥ गिरिणारक्षापिकृताव्रजस्यतेनस्वरक्षरक्षापि
कृता ॥ शक्रायव्यंजयतास्वांशक्तिंविश्वमात्मनाव्यंजयता ॥२१॥ रेमेगोपीष्वरिहासमन्मथाक्रांतसुंदरीपीष्व
रिहा ॥ पूर्णानंदैकतनुःसविश्वरुक्पावनोप्यानंदैकतनुः ॥२२॥ अथहतयोर्गलिकेश्योःश्वफल्कजप्रापितःपुरीं
गलिकेश्योः ॥ भङ्क्त्वाधनुराजवरंजघानतेनैवचस्वयंराजवरं ॥२३॥ मृद्नन्गजमुग्रबलंसबलोरंगंविवेशसूति
मुग्रबलं ॥ हत्वामल्लौबलिनौकंसंचविमोक्षितौततोरौबलिनौ ॥२४॥प्रादात्सांदीपनयेमृतपुत्रंज्ञानदीपसांदी
पनये ॥ गुर्वर्थेज्ञानतमःप्रभेदितानित्यसंभृताज्ञानतमः ॥२५॥ जित्वामागधराजंतोषितमकरोत्सदात्मयोग

यमक ॥ २॥

धराजं ॥ अनुकुर्वन्निजसदनंचक्रेरम्यंपुरंसुबोधनिजसदनं ॥२६॥ प्रसभंसगजबलस्यक्षत्रस्योच्चैःसमगधराज भारत-
बलस्य ॥ मानंशिशुपालवरंहत्वाभैष्मीमवापशिशुपालवरं ॥२७॥ हंसोडिभिकश्चपलावमुनासंसूदितौयव
नकश्चपला ॥ कीर्तिर्विमलाविरताप्रतताविश्वाधिपावनीलाविरता ॥२८॥ सत्याजांबवतीर्याभार्याविंदाद्या
मानुसांबवतीर्याः ॥ प्रद्युम्नंमोदरतःप्रापज्येष्ठंहरिःसुतंस्वमोदरतः ॥२९॥ यत्परिवारतयेशाजातादेवानृपात्म
नारतयेशाः ॥ यद्धरितंविषसर्पप्रभृतिध्वांतंनमारुतिंविषसर्प ॥३०॥ येनहिडिंबबकाद्यारक्षोधीशानिपाति
ताबबकाद्याः ॥ भीमेप्रीतिममेयांव्यंजयतातेनैवशेषपातिममेयां ॥३१॥ अथकृष्णावरणेतान्प्रापात्राज्ञोश्रृणो
त्सदावरणेतान् ॥ द्रष्टुंयातःसबलस्तांचानैषीत्पृथासुतांस्ततःसबलः ॥३२॥ तानिंद्रस्थलवासांश्चक्रेकृष्णःपरो
निजस्थलवासान् ॥ स्वबलोद्रेचितमानैर्जुगोपधर्मंचतैःपराचितमानैः ॥३३॥ वालिवधानुनयायप्रणयीसख्यं
सुसंदधेनुनयाय ॥ वासवजेनविशेषात्तेनैवपुनर्नृजन्मजेनविशेषात् ॥३४॥ मातुःपरिभवहान्यैराज्ञाद्युसदामि
तश्चपरिभवहान्यै ॥ अभवन्नरकमुरादिर्योवासीदत्समस्तनरकमुरारिः ॥३५॥ नीतोरिविदेववैरेरेमेसत्यासम ॥७४८॥
न्वितोदेववरैः ॥ सर्वर्तुवनेशशिनानिशिसत्यांवासरेवनेशशिना ॥ ३६ ॥ सुरतरुमापालिमतात्प्रकाशयञ्छ

क्तिमात्मनःपालिमतात् ॥ सुरवरवीरेषुदरीप्रधानजीवेश्वरःपरेषुदरी ॥ ३७॥ पुरमभियायारिदरीदत्वाभद्रां
पृथासुतायारिदरी ॥ शक्रपुरीमभियातःप्रादाद्वह्नेर्वनंसतामभियातः ॥३८॥ शिवभक्तप्रवराद्यंपुमान्नसेहेगि
रिशविप्रवराद्यं ॥तंस्वात्मेंद्रवरेणव्यधुनोद्भीमेनधूतरुद्रवरेण॥३९॥यस्याज्ञाबलसारैःपार्थैर्दिग्भ्योहृतंधनंबल
सारैः ॥ जित्वाक्ष्मामविशेषांप्रसह्यभूपान्समस्तकामविशेषां ॥४०॥ अथपार्थान्क्रतुराजंप्रापयदमरेट्सरुद्र
शक्रतुराजं ॥ पूजातेनावापिच्छिन्नश्चैद्यःसूतिंगतेनावापि ॥ ४१॥ निहतौसौभकरूशौशीतोभातश्चयेनतौ
भकरूशौ ॥ अजयद्वंद्वंचरणेबाणार्थैवनिपतितकचंद्रंचरणे ॥४२॥ असृजज्वरमुग्रतमःक्षयप्रदोलीलयाधिव
रमुग्रतमः ॥ क्रीडामात्रंविश्वंप्रकाशयन्नात्मनःसविहरकमात्रंविश्वं ॥ ४३ ॥ यस्यावेशोरुबलान्व्यहनत्पार्थो
सुरान्प्रजेशोरुबलान् ॥ वरदानादस्यैवजगत्प्रभोरीरणात्समनुगतनादस्यैव ॥४४॥ यस्यावेशात्सबलःप्रचक
र्षपुरंप्रसह्यचेशात्सबलः ॥ कुरुपतिनामनुयमुनाकृष्टायेनाहुरर्ह्यमतनुयमुना ॥४५॥ यद्बलवान्क्रोधवशान्नि
नायनाशंवृकोदरःक्रोधवशान् ॥ लेभेचान्यागम्यंस्थानंपुष्पाणिधामचान्यागम्यं ॥४६॥ यद्बलभारवहत्वान्ना
चलदुरगादिभिःसुभारवहत्वात् ॥ धर्मादरिहापिपदंभीमोयेनैवसाहसंरिहापिपदं ॥४७॥ नहिनहुषोलंनहितुं